# Shri Mangala Ambashtakam

# શ્રીમઙ્ગલામ્બાષ્ટકમ્

## Document Information

Text title : Mangala Ambashtakam

File name : mangalAmbAShTakam.itx

Category : devii, devI, aShTaka

Location : doc_devii

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 4, 2024

*sanskritdocuments.org*

Shri Mangala Ambashtakam

# શ્રીમઙ્ગલામ્બાષ્ટકમ્

શ્રી કુમ્ભઘોણ નગરામ્બુધિ-ચન્દ્રકાન્તે
શ્રી કુમ્ભનાથ-હૃદયામ્બુજ-ભાનુકાન્તે ।
શ્રીમદ્-ગજાનન-કુમાર-સવિત્રિ સૌમ્યે
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૧॥

સ્વર્ણાચલાકલિત-કાર્મુક-ચિત્તગેહે
સ્વર્ણ-પ્રદાન-નિરતે નમતાં નરાણામ્ ।
સ્વર્ગૌકસામપિ કૃપાપર-ધૂતભીતે
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૨॥

મન્દાર-મૂલ-વિલસન્-મણિ-મણ્ટપસ્થે
મન્માનસામ્બુરુહ-મન્થર-મત્ત-ભૃઙ્ગિ ।
મન્દસ્મિતાઞ્ચિત-મનોજ્ઞ-મુખારવિન્દે
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૩॥

કર્ણાવલમ્બિ-મણિકુણ્ડલ-મણ્ડિતાસ્યે
સ્વર્ણોપવીત-રુચિરમ્ય-ભુજાન્તરાલે ।
પર્ણામ્બુ-મૂલ-પવનાશિ-મુનીન્દ્ર-માન્યે
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૪॥

અમ્બ ત્વદીય-મુખચન્દ્રજ-ચન્દ્રિકાપ્તં
અમ્ભોધિ-તુલ્યમતિવેલમિદં પુરં નઃ ।
યદ્વૈ વિદુઃ કિલ પુરામુપમાનમેકં
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૫॥

શ્રી-મન્ત્રપીઠ-નિલયેઽમ્બ મહાતિમાયે
ચિન્તામણે શ્રિતપદાં પુરુષાર્થદાને ।
સચ્ચિત્-સુખૈક-ઘનરૂપિણિ સર્વમાતઃ
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૬॥

લીલા તવેયમખિલાખિલ-લોકમાલા
બાલાસ્તવામ્બ નિખિલા જગતાં ચ પાલાઃ ।
મૂલાદિવાકલયિતું તવ કોઽપિ નાલં
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૭॥

સ્રષ્ટા  સૃજત્યખિલમમ્બ તવાજ્ઞયૈવ
યુક્તસ્તદેવ પરિપાતિ ચ વારિજાક્ષઃ ।
અન્તે હરત્યપિ હરસ્ત્વદનુજ્ઞયૈવ
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૮॥

નારાયણાખ્ય-કવિગીતમિદં ચ ગીતં
શ્રીમઙ્ગલાષ્ટકમહો ભુવિ યે પઠન્તિ ।
તેષાં સમૃદ્ધિમતુલામિહ દેહિ માતઃ
શ્રીમઙ્ગલામ્બ મયિ દેહિ કૃપા-કટાક્ષમ્ ॥ ૯॥

મઙ્ગલામ્બાષ્ટકમિદં નારાયણ-મુખોદ્ગતમ્ ।
પઠતાં શ઼ૃણ્વતાં ચાપિ મઙ્ગલં સ્યાત્ પદે પદે ॥ ૧૦॥

ઇતિ શ્રીમઙ્ગલામ્બાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Rajani Arjun Shankar

*Shri Mangala Ambashtakam*

pdf was typeset on May 4, 2024

Please send corrections to *sanskrit@cheerful.com*